श्रीदक्षिणामूर्त्तयेनमः॥अथगदाधरभट्टकृतमुक्तिवादःप्रारंभः
श्रीरामचंद्रप्रसाद॥श्रीदुर्गायनमः॥श्रीहयग्रीवायनमः॥॥

मुक्ति० १

श्रीदक्षिणामूर्त्तयेनमः॥ ॥प्रयोजनमुद्दिश्येवतदुपायेपुमांसःप्रवर्त्तंतेअतःशास्त्रस्यप्रयोजनंप्रथमतःप्रदर्शयंतिशास्त्रकृतःस्वतःप्रयोजनंसूत्रंवतद्द्वेगोदुः
खाभावश्चतत्रंचान्यज्ञानधीनज्ञविषयत्वंनतुप्रयोज्यंतराजनकत्वेसतिप्रयोजनकत्वंस्वसाक्षात्कारनूपमोगंप्रतिजनकसूखव्याप्तेःगौणप्रयोजनमन्यज्ञ
धीनज्ञविषयेभोजनादिःतत्रसूखादिनूपफलानुसंधानादेवोत्पत्तेःदुःखासंमिन्नसूखनूपतयास्वर्गस्येवान्वीक्षिक्यादिशास्त्रफलस्यापवर्गस्याप्या
त्यंतिकदुःखनिवृत्तिनूपस्यस्वतरावप्रयोजनत्वं॥मुक्तेाप्रमाणंतुदेवदत्तदुःखंदुःखंवासान्वयासमानकालीनध्वंसप्रतियोगिवृत्तिकार्ययान्नवृत्तित्वसं
ततित्वाद्देहतत्प्रदेशवत्संततित्वंचनानाकार्यमात्रवृत्तित्वंआत्माज्ञातव्यानसपुनरावर्त्ततइतिश्रुतिस्यप्रमाणं॥आवर्त्ततेशरीरंभवतीत्यर्थःनचापवर्ग
स्यान्नूपस्यसूखविरोधितयानपुरुषार्थत्वसंभवःसूखाभावनियतत्वेपिदुःखाभावत्वेनात्यंतिकत्वाविशेषितेनतद्विशेषितेनचतत्रेशसत्ताबाध
कविरहेणप्रयोजनत्वोपपत्तेःनचसूखाभावनियतत्वेनद्वेषसंभवात्तत्रनज्ञासंभवइतिवाच्यं॥स्वतःप्रयोजनस्यद्वेषविषयत्वायोग्यत्वात्धर्मादिना
शकृतत्वज्ञानद्वारासूखनिवृत्तिसाधनत्वेनमोक्षोपायेयोगाभ्यासादिद्वेषसंभवाद्विशेषदर्शनांप्रवृत्त्यनुपपत्तिरितिचेत्सूखभूत्वल्परागवतांविषयिणंग्
सूखाभावेउत्कटद्वेषादयेनमोक्षोपायेनभवत्येवप्रवृत्तिः तदुक्तंमणिकृतातस्मादविवेकिनःसूखमात्रलिप्सावाबहुनरदुःखानुविधसूखमुद्दिश्यशिरा
मदीयंयदियातियातुइतिकृत्वापरदारादिषुप्रवर्त्तमानावरवृंदावनरम्यइत्यादिवदंतानात्राधिकारिणःयेचविवेकिनोस्मिन्संसारकांतारेक्लेशंतिदुः

रामः १

१ युष्मद्धृतरंजनखंजनगंजनाक्षिशोभादीयंयस्यातुयातुनीतानिनाशंजनकात्मजार्थदर्शनेननानीतानिकृत्वानिश्चितस्वर्थःस्वेइतिसंगलत्वेभजाम्यहंन
नुवंशविकीमुक्तिंप्रार्थयामिवदाचनेतिश्लोकवल्लभः॥१ २ इतिसंचनमणिकृतातदुक्तमित्यन्वेति २

खदुर्दिनानिन्द्रियतोवासरखद्योतिकृतिकुपितफणिफणामंडलछायाप्रतिमामिदमितिमन्यमानाः सुखमपिहातुमिच्छंतितत्राधिकारिणइतिविवेकिनांतु
बहुतरदुःखानुविद्धतयासुखेनोत्कटोरागइतितदभावेपिनोत्कटोद्वेषइतिबलवद्द्वेषविषयसाधनस्यैवप्रवृत्तिविरोधितयामोक्षोपायेनप्रवृत्त्यनुपप
त्तिः स्वर्गेपिपातभयादिजन्यदुःखानुविद्धतयाक्षयितयाचनविवेकिनामुत्कटोरागः॥रागद्वेषयोरुत्कटत्वेजातिविशेषः प्रवृत्तिनिवृत्तिभ्यांकल्प
नीयः तन्नियामिकाचसामग्रीतत्तज्जन्यज्ञानशक्त्यादिघटिताऽननुगतैवतुल्येपिबहुतरदुःखानुविद्धत्वादिज्ञानसुखतदभावयोर्विषयिणामुत्क
टरागोत्कटद्वेषादयात्विवेकिनांतदनुदयात् अथदुःखानिवृत्तिर्दुःखध्वंसरूपोभावोननुप्रागभावात्यंताभावोनित्यत्वेनासाध्यत्वात्॥ध्वंसस्यचानं
तरोत्पन्नविशेषगुणादेवसंभवेननतत्तज्ज्ञानाद्युपयोगः स्वसमानाधिकरणदुःखासमानकालीनत्वंपर्याप्तिरूपविशेषितदुःखध्वंससंनूपापवर्ग
त्वावच्छिन्नस्यतत्तज्ज्ञाननिरपेक्षकारणांतरान्निर्वाहइतिचेदेवमपिनतादृशधर्मस्यतत्तज्ज्ञानजन्यतावच्छेदकत्वसंभवः चरमदुःखध्वंसदशायां
तद्दशात्मनिदुःखजनकाधर्मनूपकारणविरहेणदुःखानुत्पत्त्याऽर्थवशादेवतस्यस्वसमानाधिकरणदुःखासमानकालीनत्वनिर्वाहात्अर्थस
मान्नूपबाधकग्रस्तस्यकार्यतावच्छेदकत्वाद्व्यर्थापुरुषांतरीयदुःखासमानकालीनदुःखध्वंसत्वादरूपिकिंचित्कारणकार्यतावच्छेदकत्वापातात्॥
नैवंअर्थसमाजस्थलेसाधकाभावएवकार्यतावच्छेदकत्वेबाधकउपदर्शितमुक्तावच्छिन्नंप्रतितत्तज्ज्ञानहेतुनायाश्रुतिस्मृत्यादिसाक्षिकतया

नबाधःमाभूदतादृशतत्त्वज्ञानस्यतादृशमुक्तित्वावच्छिन्नंप्रतिकारणतातथापितदवच्छिन्नतत्त्वज्ञानस्यप्रयोजकत्वंदुर्वारमेवतत्त्वज्ञानंविनापाप
प्रवाहविच्छेदस्यासंभवेनदुःखानुवृत्तेरावश्यकतयादुःखध्वंसेदुःखासमानकालीनत्वानिर्वाहात्।येनविनायधर्मावच्छिन्ननिर्वाहस्तस्यैवतदव
च्छिन्नप्रयोजकत्वात्प्रयोजकत्वंचस्वरूपसंबंधविशेषःइत्यप्रयोजकत्वज्ञानमेवोपायत्वाहेतुरितिमुमुक्षयातत्त्वज्ञानंवानिर्वाह्यम्॥दुःखेनात्यं
तंविमुक्तश्चरतिअशरीरंवावसंतंप्रियाप्रियेनस्पृशतइत्यादिश्रुतिवाक्यानितत्त्वज्ञानवतांदुःखात्यंतविमुक्तिबोधकानुमुक्तिप्रयोजकत्वप
राण्येवतियन्तुदुःखानुत्पादएवमोक्षःसचप्रागभावरूपतयाऽजन्योपितत्त्वज्ञानादिसाध्यक्षेमसाधारणसाधनताज्ञानस्यैवचप्रवर्त्तक
तादुःखंमेमाभूदित्याद्दिश्यवैदिकप्रायश्चित्तादौलौकिकेचाहिकंटकापनयनादौप्रवृत्तिदर्शनात्क्षेमरूपंचसाधनत्वंलब्धपरिरक्षणंसि
द्धस्यानंतरकालसत्वनिर्वाहकत्वंप्रागभावस्यापिउत्तरोत्तरकालसंबंधः प्रतियोग्युत्पादविरोधिनिर्वाह्यंदुःखात्पादविरोधीचदुःखबीजभूताऽ
धर्मनाशहेतुरात्मतत्त्वावबोधएवइतितत्साध्यत्वंदुःखप्रागभावस्यनिर्मलंतदर्थकंनिर्विशेषितदुःखप्रागभावस्यसंसारदशासाधारणत
यास्वसमानाधिकरणदुःखासमानकालीनध्वंसविशिष्टएवासौमोक्षरूपावाच्यःतादृशस्याप्रसिद्धःमुक्तस्यदुःखानुत्पत्तेर्मोक्षदशायां
तत्प्रागभावासत्वात्॥अनागतस्यैवप्रागभावप्रतियोगित्वात्दुःखंमेमाभूदित्यादिकामनाचोत्तरकालसंबंधविशिष्टदुःखात्यंताभावबि

३ मतमिति प्राभाकराणामित्यादि क्वचित्तथैवमूलं ३

वधिण्येवनित्यसेपितस्यप्रागभावस्साध्यत्वमविरुद्धंदुःखप्रागभावाभावविशिष्टोऽदुःखात्यंताभावरावमोक्षः सुषुप्त्यादिदशायांविशेष
णाभावान्नातिप्रसंगइतिसूक्ष्मं।अथयथाहूरस्थसरोवगाहनादिसाध्यस्यतदुपायपूर्वकत्वादिविशेषणविशिष्टसंतापशांत्यादिरूपफल
स्यानायाससिद्धवृक्ष्यादितोऽनिर्वाहेपिविशेष्यसंतापशांत्यादिरूपफलस्यवृक्ष्यादितोनिर्वाहप्रतिसंधानेहरस्थसरोवगाहनादौतज्ज्ञान्यश्र
मेवक्वचिदल्पद्वेषवशात्प्रवृत्तिस्तथादुःखनिवृत्तिमात्रस्यलघूपायतोपिनिर्वाहप्रतिसंधानेनात्यंतिकदुःखनिवृत्तिरूपमोक्षार्थितयापिबहु
तरश्रमानुविधायोगाभ्यासादौप्रवृत्तिरनुपपन्नेतिचेन्नयथासुखमात्रस्यलघूपायसाध्यत्वप्रतिसंधानेपिदुःखासंभिन्नसुखरूपस्वर्गा
र्थितयाबहुतरवित्तव्ययायाससाध्ययागादावपिप्रवर्त्तनेदुःखासंभिन्नत्वरूपविशेषणपुरस्कारेणोत्कटरागसंभवाद्बहुतरवित्तव्ययासादौ
उत्कटद्वेषानुदयात्तथात्यंतिकत्वविशेषणपुरस्कारेणापिउत्कटरागस्यानुभाविकतयातद्विशिष्टफलार्थितयाबहुतरश्रमानुविधेपिउ
मोक्षोपायप्रवृत्तिसंभवात्।उपादेयतानवच्छेदकसरोवगाहनपूर्वकत्वादिविशेषणविशिष्टसंतापशांतादिफलरागोत्तरविरहात्तूत्कटस्थले
सरोवगाहनप्रवृत्तेरयोगात्तदुचितदुःखध्वंसस्यकारणांतरादवश्यंभवेननित्यत्वज्ञानादिजन्यत्वमित्यालोच्यदुःखबीजदुरितनाशस्यवा

१ तत्त्वज्ञानविशेषादिजन्यतायगुणनाशस्यावश्यंस्वीकार्यतानिरूपितस्वोत्तरवर्त्तित्वा
वच्छिन्नदुःखकारणांतराद्वित्यर्थः॥१

१ दुरितस्यतुयोग्यतविरहेणानस्वोत्तरगुणनाश्यत्वमितिभावः॥१

त्यंतिकस्यमोक्षस्यनूपपत्तिरितिचेन्नतस्यात्यंतिकत्वंस्वसमानाधिकरणदुरितासमानकालीनत्वमेवमोगजन्येप्रायश्चित्तजन्येचदुरितनाशेऽतिप्रसंगात्तस्यचभोगादेवक्षयसंभवात्तथाचतत्त्वज्ञानिनोपिनारब्धक्षयःसुखोपायप्रवर्त्तेतदुःखोपायाच्चनिवर्त्तेतनचतत्त्वज्ञानजन्यदुरितनिवृत्तेस्तादृशदुरितसमानकालीनतयानोक्तरूपमात्यंतिकत्वंनिर्वहतीतिवाच्यंज्ञातेपितत्त्वज्ञानेभोगात्प्रारब्धकर्मसंक्षीणेष्वतत्त्वज्ञानांतरादितरदुरितनाशोपगमात्तस्यैवात्यंतिकत्वेनमोक्षस्वरूपत्वात्॥नचतादृशकर्मसुविद्यमानेचैवतत्त्वज्ञानस्वरूपनाशकबलात्कथंनेतरकर्मक्षयइतिवाच्यं॥चरमतत्त्वज्ञानएवदुरितनाशकतावच्छेदकजातिविशेषोपगमात्॥नचतत्त्वज्ञानादशेषदुरितनाशेऽर्थवशादवतस्यस्वसमानाधिकरणदुरितासमानकालीनत्वरूपात्यंतिकत्वंनिर्वाहइतिपुरुषांतरीयदुरितासमानकालीनदुरितध्वंसस्ववन्निरुक्तमुक्तित्वमपिनतत्त्वज्ञानजन्यतावच्छेदकंतत्त्वज्ञाननाश्यतावच्छेदकतयाचनदुरितेषुजातिविशेषकल्पनासंभवःगोवधादिजन्यनावच्छेदकंजातिभिःसंकरप्रसंगात्अविशेषेणदुरितनाशत्वेनापिनतत्त्वज्ञानंजन्यतावच्छेदकंसंभवःभोगादिजन्यदुरितनाशेव्यभिचारादितिकथंतादृश्यामपिमुक्तौनतत्त्वज्ञानस्यहेतुतेनिवाच्यंभोगादिघटितसामग्रीमंतरेणैवतत्त्वज्ञाननदुरितनाशात्तन्नाशेतुऽनाथाऽावश्यकत्वेनागत्यात्यंतिकत्वविशिष्टस्यैवतस्यजन्यतावच्छेदकत्वसिद्धेपुरुषांतरीयदुरितासमानकालीनत्वविशिष्टस्यदुरितनाशत्वस्य

३नोगादिनाशेगोवधजन्येदुरितेतत्त्वज्ञाननाशतावच्छेदकाभावःगोवधजन्यतत्त्वज्ञाननाशेगोवधजन्यतावच्छेदकाभावःतत्त्वज्ञाननाशेगोवधजन्यउभयोःसमावेशादितिभावः३

जन्यतावच्छेदकत्वमानाभावएवबाधकः अथदुरितनाशेपितत्वज्ञानहेतुत्वमप्रामाणिकंभोगादेवसर्वादृष्टनाशोपगमात्अन्यथानामुक्तंसीयतेकर्मकऽ
ल्पकादिशतैरपिइत्यादिवचनविरोधःस्यात्॥नचतत्त्वज्ञानेनकर्मणोऽविनाशितत्वज्ञानिनामात्यंतिकदुःखनिवृत्तेःकथंस्यादितिवाच्यंप्राचीनकर्मणांऽ
भोगादेवक्षयेणवासनाविरहेणचनिषिद्धाचरणादिनाऽदृष्टांतराजननात्दुःखानुत्पादनकतिपयकालोत्तरमात्यंतिकदुःखविनिगमसंभवात्अ
तएवतत्त्वज्ञाननकर्मणामविनाशेदुःखस्यावश्यकतयातत्त्वज्ञानोपायप्रवृत्यनुपपत्तिरित्यपिसमाहितंनचभिद्यतेहृदयग्रंथिछिद्यंतेसर्वसंशयाःक्षीयं
तेचास्यकर्माणितस्मिन्दृष्टेपरावरेयथैधांसिसमिद्धोग्निर्भस्मसात्कुरुतेर्जुन॥ज्ञानाग्निस्सर्वकर्माणिभस्मसात्कुरुतेतथेतिबहुतरवाक्यबोधितंतत्त्वज्ञानस्य
कर्मनाशकत्वंदुरपन्हवमितिवाच्यं॥नाभुक्तमितिवचनानिरोधानुरोधनज्ञानंकायव्यूहसंपादनद्वाराऽऽरब्धितिसर्वकर्मभोगेनिर्वाह्यतानिनाशयतिइत्यत्रैव
ज्ञानस्यकर्मनाशकताबोधकवाक्यानांतात्पर्योपगमात्यथाग्नेरिंधननाशेभस्मनिचपरंपरयैवहेतुनातथाज्ञानस्यापिकर्मनाशेइत्येतत्सूचनायैवज्ञानऽ
स्याग्नेरेवनिरूपणंनचनाभुक्तमित्यादिवाक्यकर्मपदंलक्षणयैवादृष्टार्थकमुपगंतव्यंतस्यक्रियायामेवशक्तेरितिलक्षणायाआवश्यकत्वेज्ञानाऽ
धनाश्यादृष्टरावश्यकतरावविरोधभंगेकिमर्थंतत्त्वज्ञानिनांसकलकर्मभोगकल्पनामितिवाच्यं॥अदृष्टेपिकर्मपदस्यानादिप्रयोगप्रवाहदर्शनात्
तत्रसामान्यरूपणतल्लक्षणायाःशक्तितुल्यत्वातत्कल्पनालाघवानुरोधनविशेषरूपणस्वारसिकलक्षणायाअयुक्तत्वाच्चेतत्मतेकर्मणांभोगावश्य

१ नक्षयेतिनस्यमुक्तस्यकर्मणोयोभोगोनकालिकःक्षयःसदेपेक्षयातीतोयःकर्मनाशहेतुःसतूर्वकालिकोभोगस्तदनुपहितंयदभक्तकर्मांतरंतत्रतस्यमुक्तकर्मणोयःक्षयोध्वंसःसएति
योगित्वंनिषिध्यतेइत्यर्थःभोगानुपहितदर्मधर्मिकाभक्तकर्मप्रतियोगिकनाशप्रतियोगित्वाभावोवाक्यार्थः॥१ २विशेषस्तूक्तादिसाक्षात्कारेतूपः२

मुक्ति० ४

कृतयामुक्तकर्माप्रसिध्यातादृशवाक्यस्ययथाश्रुतार्थपरतानसंभवत्येवेतिवाच्यंअतीतत्वस्यनप्रत्ययनविवक्षणात्ततेक्षयापेक्षयाऽतीतोयोभोगस्तद्
नुपहितकर्मणितत्क्षयप्रतियोगित्वनिषेधनूपयथाश्रुतार्थप्रसिध्यनवकाशात्यद्यपिभोगानुभवविशेषंतद्विषयत्वनूपंभक्तत्वंनकुत्राप्यदृष्टेनथा
पिभोगविषयफलोपधानमवभोगदर्मत्वंप्रकृतेविवक्षितंस्मरंभुज्यतइतिवत्पुण्यंभुज्यतइतिप्रयोगदर्शनात्तादृशार्थस्यापिफलमनुसाद्य
नश्यतितथानकर्मइत्यवलभ्यतेतथाचज्ञानादपिकर्मनाशेनकश्चिद्विरोधः अन्यथाप्रायश्चित्तादपिकर्मनाशेनतादृशविरोधपरिहारासंभवात्
प्रायश्चित्तस्यपापानाशकत्वेतत्रप्रवृत्त्यनुपपत्तेः नचप्रायश्चित्तस्यापिकायव्यूहाधीनइष्टेतिभोगसंपादनद्वाराषापनाशकत्वमितितत्रप्रवृत्तिरूपप
द्यतएवेतिवाच्यंदुःखव्यक्तीनांसाम्येइष्टेतिविलंबभोगयोरविशेषेणप्रायश्चित्तानर्थक्यात्एवंचावश्यमेवभोक्तव्यमित्यस्याविरोधायज्ञानिनाः
मपिसकलकर्मभोगापगमइत्यर्थयुक्तंकृतप्रायश्चित्तानांकर्मणांभोगाभावातत्रकर्मपदस्यवेदबोधितनाशकानाश्यकर्मपरतायाःअवश्यकत्वे
नज्ञाननूपनाशकस्यापिवेदबोधिततयातेनभोगंविनैवकर्मनाशेसतिविरहात्तत्वज्ञानस्यसाक्षात्अदृष्टनाशकत्वेकचिद्भोगःकचिच्चत
त्वज्ञानंइत्यननुगमेनव्यभिचारात्भोगस्यादृष्टनाशकारणतानसंभवतीत्यपिनाशंकनीयंभोगोपहितादृष्टनाशस्यभोगजन्यतावच्छेदकतया
व्यभिचारानवकाशात्अन्यथातवापिप्रायश्चित्तकीर्त्तनादिजन्यादृष्टनाशेव्यभिचारात्अथदुरितनाशस्यैदुःखाभावभिन्नतयातद्रूपस्यमोक्ष

राम० सूत्र४

स्यकथंस्वतःप्रयोजनत्वमितिचेन्नयतोयथावस्थंचिदुःखाभावनिर्वाहकतयागौणप्रयोजनत्वमेवअथवंमिथ्याधीजन्यवासनायाअदृष्टद्वारादुःखप्रयोजकतऽ
यानन्निवृत्तेरपिदुःखाभावनिर्वाहकतयापुरुषार्थत्वेनतस्याएवकुतोनमोक्षनूपतोपयतइतिचेन्नउत्पन्नतत्त्वज्ञानानांवासननिवृत्तावपियावत्प्रारब्धश
रीराणांकर्मणांनोळदस्तावदपवर्गानभ्युपगमात्तावद्वास्यचिरंयावत्रविमोक्ष्येऽथसंपत्स्येतेकैवल्येनतिश्रुत्यापिप्रारब्धकर्मविमोक्षपर्यंतेज्ञानिनः
कैवल्यविलंबबोधनादित्याहुःएककंदंडिनोवदंतिनस्तुयदुपाध्यनवछिन्नस्यब्रह्मणोविराड्नृपतातादृशोपाधिविगमएवकैवल्यंतादृशस्या
पाधिरविद्यैवतितन्निवृत्तिरेवनतदुःखस्यांतःकरणविशेषबुद्धिधर्मतयातस्याश्चस्वजनकाविद्यानाशनाश्यतयाऽनिवृत्तेःस्वतःप्रयोजनत्वविरहेपि
दुःखनिवृत्तिनिदानतयाप्रयोजनत्वंदुरपवादमेवाअविद्याचपदार्थांतरमजन्यमपिविनाशप्रतियोगितन्नाशंकृत्वब्रह्मसंवेदनेनचाविद्यानूपावरणस
त्वब्रह्मसंवेदनमेवदुर्घटमितिवाच्यंब्रह्मसंवेदनंहिब्रह्माकारांतःकरणवृत्तिःन्यत्रोक्तांतःकरणपरिणामएवविषयावरणभूताविद्यानिवृत्तिफलवः
तदुक्तंबुद्धिवृत्तिर्विदाभासोहावपिव्याप्नुतोघटंतत्राज्ञानंधियानस्यदाभासान्तुघटस्मरेदितिएकंचविद्यायाअंतःकरणवृत्तानविरोधितापिनुविषयऽ
स्फूर्त्तावेवस्फूर्तिश्चप्रकटतासापिभट्टानामिवपदार्थांतरमेवतिन्नचब्रह्मणोतःकरणवृत्तिविषयत्वंब्रह्मणः स्वप्रकाशश्चैतन्यनूपतासिद्धांतविरोधः
स्वेनवप्रकाशेनावगाह्यनंयस्येतिव्युत्पत्यास्वमात्रविषयत्वेवस्तुप्रकाशपदार्थत्वादितिवाच्यंयस्यस्वतरावस्फूर्तिस्तस्यैवस्वप्रकाशत्वात्जडात्मकस्यप्र

पंचस्यहिस्फूर्तिर्नस्वतरावकिंतुफलतदृत्तिव्याप्यविषयचित्प्रतिबिंबरूपाभिभाषिकंफलंतदुक्तंमाहातीतोविशुद्धोमुनिभिरभिहितोमोहसंक्रां
तमूर्त्तिःसाक्षीस्वांतनदृश्यप्रतिफलितवपुर्गीयतेसोप्रमातादृश्यारूढःप्रमाणंफलमपिधिषणावृत्तिसंव्याप्यचैत्योपाधिर्महोक्षशब्दप्रमुख
विषयगःस्यात्प्रमयःपरमात्मतिब्रह्मणश्चस्फूर्तिःस्वतरावनतुचिदाभासात्चैतन्यन्नूपवस्तुनिचैतन्यवस्तुप्रतिबिंबासंभवात्तेतनब्रह्ल
संवदनंब्रह्मज्ञानंरावंचस्वविषयकज्ञाननूपंब्रह्मैवतथातिनित्यतयासंसारदशायामपितत्सत्वनाविद्यानिवृत्तिप्रसंगइत्यपिपरास्तंअंतःक
रणवृत्तिन्नूपब्रह्मसंवदनस्यैवाविद्यानिवर्त्तकतयाब्रह्माकारवृत्तेःसंसारदशायामसत्वनातिप्रसंगाप्रसक्तेःत्रिदंडिनस्तुज्ञानंदमयेपरमा
त्मनिजीवात्मनोलयोमोक्षःपरमात्मजीवात्मनोरभेदेपिउपाधिविशेषविशिष्टस्यात्मनोजीवन्नूपतयातस्योपाधिक्षःपरमात्मभेदइतिभेद
कोपाधिविगमएवजीवस्यपरमात्मनिलयःयथाघटाकाशस्यघटविगमएवशूधाकाशेलयःलिंगशरीरावछिन्नस्यैवचात्मनोजीवभा
वइतिलिंगशरीरनाशएवपर्यवसितोमोक्षःलिंगशरीरंचस्थूलशरीराबीजभूतमहंदहंकारतन्मात्रारव्यभूतसूक्ष्मैकादशेंद्रियसमुदाय
स्तद्विशिष्टस्यात्मनोदुःखादिमत्तयाविशेषणीभूतलिंगशरीरस्यनाशेदुःखंनोत्पत्तुमर्हतिविशेषणमन्तरावदृक्तारव्यसंबंधविशेष
वत्क्षत्रियांतर्भूतंतन्मात्रवाश्रयःसर्वथैवतस्यदुःखहेतुत्वात्एवंचतद्विगमस्यदुःखनिवृत्तिहेतुतयापुरुषार्थत्वमस्तमेवंतिरावम

स्मरणाद्याश्रयत्वेतद्धेतुधर्माद्याश्रयत्वंतस्यैववाच्यमितिसंसारात्मकत्वपरिहारायअनादित्वंस्मरणादिधर्मिणउपेयमित्यनादिभावानाशेनसंभवतीतिभावः४ एकदंडिमतात्१

पिमायाधीनस्यप्रपंचस्यमायानिवृत्त्यैवनिवृत्तेर्मायानिवृत्तेर्मोक्षदशायामावश्यकत्वंअविद्येवचमायात्वेनतन्मतेपरिभाषितेतिफलतोनविशेषः अत्रन्यायविदः अविद्यानथदार्थोतनंमानाभावात्किंत्वदृक्समवतत्वज्ञाननूपविद्याविरोधितयाऽविद्येत्युच्यतेअदृष्टव्यक्तीनांसादित्वेपितत्प्रवाहस्यानादितयाऽविद्यायाऽनादितापवादःतथाचतन्निवृत्तिस्तदधीनादुःखनिवृत्तिर्वामोक्षइतिनिष्प्रत्यूहमेवयन्तुअविद्यानिवृत्यावुद्धिनिवृत्तेतधर्मस्यदुःखस्यनिवृत्तिर्गतितदपिनयुक्तिपथमारोहतिबुद्धेःस्मरवदुःखाद्याश्रयत्वेतस्यविनाशेमानाभावात्तनचदुःखार्थंतोऽदानुरोधात्तन्नाशोपगमस्तत्सत्वथदृष्टोऽदादवदुःखप्रवाहोऽदसंभवात्तनचाश्रयनाशंविनाशेषादृष्टनाशएवानुपपन्नःआश्रयसत्वेपिसमानाऽधिकरणतत्वज्ञानोदयेशेषादृष्टनाशसंभवात्भवन्मतेत्यविद्यानाशेतद्धेतुतायाआवश्यकत्वात्पुनरदृष्टानुत्पत्तिस्थ्यवासनादिविरहात्योगिनांबुध्यादिसत्वेपयदृष्टानुत्पत्तिमवन्मतेपयदृष्टस्यवासनोहेतुकत्वात्अथविद्यायाःपदार्थांतरत्वेचद्विदृषस्तदामामृतस्यास्तथात्वंअदृष्टंमिथ्याज्ञानाहितवासनेववाभवत्वविद्यातत्वज्ञानंतदृष्टनाशेनसाक्षाद्धेतुरपितुबुध्देर्विनाशावबुध्देर्ज्ञानाद्याश्रयतयातत्वज्ञानस्याश्रयतानूपसाक्ष्यात्संबंधस्यनाशकतावच्छेदकतयालाघवात्अदृष्टसामानाधिकरण्येनूपपत्तेरसंबंधेनवृत्तत्वज्ञानसत्वात्तस्यतन्नाशकत्वेनाशकतावच्छेदकप्रत्यासत्तिगारवात्तन्नचप्रतियोगिनिष्ठप्रत्यासत्याज्ञानस्यादृष्टनाशकत्वापगमरावेगारवंनाशाधिकरणनिष्ठसाक्षात्संबंधेनवतस्यतन्नाशप्रतिहेतुत्वमुपगंत

१ अदृष्टेपादानबुध्यावभावीयविशेषनासंबंधेनादृष्टनाशंप्रतिसमवायेननत्वज्ञानंद्वारणमितिनसंबंधगौरवमितिभावः१ २ प्रतियोगितासंबंधस्यकार्यतावच्छेदकत्वादितिभावः२

व्यमितिवाच्यंतथासतिनाशप्रतियोगित्वनियामकाभावेनातिप्रसंगापातात्।।एवंवासनानाशेतत्वज्ञानस्यपृथक्कारणतादूरस्थेनापिन्यायमतेगौरवंतस्य
बुद्धिनाशकत्वेतन्नाशादेवादृष्टनाशवद्वासनानाशोपपत्तेस्तत्वज्ञानस्यपृथक्कारणतानुपगमात्अदृष्टादिनाशेवबुद्धिनाशस्यकारणतायानाधिक्य
माश्रयनाशस्याश्रितनाशंप्रतिदुष्प्रकारणतयेवोपपत्तेस्तथाचजीवोवापाधिविगमेवापवर्गइत्येतदेवोचितमितिचेन्नबुद्धितत्वस्यानादित्वेविना
शानुपपत्तेर्भावनाशेजन्यत्वेनप्रतियोगिनोहेतुत्वादित्येवबुद्धिधर्मादृष्टप्रवाहस्यापिसादितयाप्रथममदृष्टेवैचित्र्यंभागातत्कार्यवैचित्र्यंचन
स्यात्नचादृष्टजनककृतिवैचित्र्याददृष्टवैचित्र्यप्रथमतःसंभवतिप्रथमतःकृतिवैचित्र्यप्रयोजकस्यवदुर्लभत्वात्तस्मादृष्टादिसमवा
यिनानित्यत्वमवानादिविचित्रादृष्टप्रवाहात्पुंसांभोगवैचित्र्यमितिरातेन्मूलप्रकृतिपरिणामविशेषाबुद्धिर्महदाख्यातन्नवादृष्टंकृत्यादिकंच
पुरुषास्तुकूटस्थचैतन्यरूपोजन्यधर्मानाश्रयत्वेकौटस्थ्यंबुद्धिधर्माःकृत्यादयोबुद्धिपरिणामविशेषोहंकारेणपुंसाराप्यंततदुक्तमहंकारवि
मूढात्मकर्त्ताहमितिमन्यतइतिबध्युपरागएवपुरुषाणांबंधःतदनुपरागएवतेषामपवर्गइतिसांख्यमतमपपास्तंबुद्धरुत्पत्तानादित्वसादित्व
विकल्पकवलितत्वात्ततदुक्तमाचार्यैःअन्यथानपवर्गस्यादसंसाराथवापुनरितिउसंसारःसंसारवैचित्र्यंभट्टास्तुनित्यसुखसाक्षात्कोपवर्गः
नचनित्यसुखमप्राणिकंआनंदंब्रह्मणोरूपंतच्चमोक्षेप्रतिष्ठितमित्यादिबहुतरप्रमाणसंभवात्आनंदमितिवादसंनपुंसकत्वंब्रह्मणोरूपंआत्म

नाधर्मः मोक्षेमोक्षसमयप्रतिहितंसाक्षात्कृतमित्यर्थः।तादृशप्रमाणेनमोक्षकालीनमाक्षात्कारविषयसूखंसिध्येत्।नित्यतायांपर्यवसानात्कचित्तुनित्यंविज्ञानमानंदंब्रह्मेत्यादिश्रुतिरानंदविशिष्टात्मनोनित्यतांबाधयतिविशिष्टान्वयपरतायाऔत्सर्गिकत्वा
अस्तिबाधकत्यागायागादितिविशेषणस्यानंदस्यापिनित्यत्वेसबप्रमाणेनित्याहुः।तन्निंत्यंतथासतिनतोनित्यज्ञानस्यापिसिध्यिप्रसंगात्।नचमीमांस
कानांतदनुमतेवदंतिनामेवयथाश्रुततादृशश्रुतिबलात्।सुखत्वात्मकस्यपरमात्मनःसिध्यिःतथाचतदैक्यवाक्यतयाआनंदंब्रह्मणोरूपमित्यत्र
सुखंब्रह्मणःस्वरूपमित्यर्थःमोक्षेप्रतिहितमितिउक्तस्यचसप्रत्याजनकत्वार्थकतयाभविष्यतीत्यध्याहारणवाशास्त्रंतमतत्रविधानिवृत्तिरूपमोक्षस
साक्षात्कारविषयइत्यर्थःअथाशरीरंवावसंतंप्रियाप्रियेनस्पृशतइत्यादिश्रुतिविरोधात्सुखस्यसूखस्वीकारासंभवःनचतत्रवाक्यभेदभिया
प्रत्यक्षनिषेधपरतानस्वीक्रियतेअपितूभयाभावपरतैवतथाचसूखसत्वेपिदुःखाभावाद्दुभयाभावसत्वेननविरोधःअभ्यासज्यवृत्यनुगतनूपा
वच्छिन्नाभावपरतयातुवाक्यभेदपरिहारउपायकारानुमतोनसाधीयान्।प्रियाप्रिययोरुपेदनप्रतिपादनरावनत्संभवात्।दुःखाभावाद्दुभयाभावःसु
खाभावाद्दतिविनिगमनाविरहोनाशंकनीयःदुःखेनात्यंतविमुक्तस्यरतीत्यादिश्रुतिबलात्दुःखाभावस्यप्रामाणिकत्वान्तस्यैवाभयाभावप्रयोज
कत्वादितिवाच्यंयतःप्रियाप्रियेनस्पृशतइत्यनेनप्रियाप्रिययोरभावोनप्रत्याप्यतेअपितुतद्दुभयानुयोगिकोमुक्तात्मकर्मकस्पर्शकर्तृत्वाभावए

४ सुखदुःखान्यतनत्तमेवप्रकृतंतथा ४

१ मुक्तावनुयोगिकसंबंधप्रतियोगित्वन्नूपप्रतियोगिप्रतिसंधेवइत्यर्थः१

मुक्ति०

वंतत्कर्मकस्पर्शकर्तृत्वंचतदनुयोगिकसंबंधप्रतियोगित्वंप्रियेसंधेवताद्दशसंबंधप्रतियोगितासत्वंचतदुभयत्वावछिन्नेपितत्रतदभावबाधःप्रति
योगिमेतिव्याप्तज्यवृत्तिधर्मावछिन्नानुयोगिताकाभावानभ्युपगमात्तन्चस्पृशधातुरत्रसत्तार्थकःतथाचयथाघटपटौतन्तइत्यत्रघटपटाभा
वश्तित्वंप्रतीयेततथाप्रकृतेपिसंधेवदुःखेनयाभावस्तित्वंप्रतीयतइतिवाच्यंतथासतिधातोनकर्मकतयाशरीरमितिद्वितीयानुपपत्तेःअ
नुयोगिनासप्रमीविनाप्रतीयदिकार्थाभावप्रत्ययायोगाच्चेतिचन्नमोक्षेसंधेवसत्वबोधकानंदमित्यादिश्रुतिविरोधप्रसंधेवनमुक्तात्मनिविद्य
मानेपिसंधेवतद्वृत्तितानवच्छेदकाभयत्वावछिन्नमुक्तात्मनिष्ठसंबंधप्रतियोगित्वाभावोपगमात्तदाकरणवगळतिनतुहाविद्यादिव्यवहारात्॥
प्रतियोग्यधिकरणव्याप्तज्यवृत्तिधर्मावछिन्नानुयोगिताकाभावस्यावश्यकत्वाच्च अथवानस्पृशेतइत्यस्यात्यंतिकसंबंधस्यप्रतियोगि
त्वाभावोर्थःनचधातोरुत्पत्तिसंबंधार्थकत्वेजन्यादिवदकर्मकतास्यादितिवाच्यं॥आद्यक्षणानुयोगिकसंबंधार्थकतयाजन्यप्रसूतीछ
नासकर्मकत्वात्अत्राद्यक्षणावछिन्नसंबंधस्यधात्वर्थतयातदनुयोगितयात्मनःकर्मतासंभवात्अथवाप्रियपदंजन्यसंधेवपरमेवतथाचन
कश्चिद्दोषःअथशरीरनूपकानणविरहेणमुक्तस्यसंधेवसाक्षात्कारानुपपत्तिःतत्साक्षात्कारस्यापिनित्यत्वेमुक्तसंसारिणोरविशेषप्रसं
गइतिचन्नअवछिन्नज्ञानंप्रत्यवशरीरस्यहेतुत्वात्शरीरानवछिन्नस्यनित्यसंधेवसाक्षात्कारस्यशरीरसंतरेणाप्ययत्नसंभवात्न्यायमतनि

राम० ७

४ तथाचनित्यसंधेवेपितत्संभवइतिभावः४

शरीरघटितेतिपाठः यद्वाशरीरंनघटकंयस्याइतिसमासः३

तज्ज्ञान

त्यन्तरज्ञानव्यावर्त्तयेजन्यत्वस्यावश्यंनिवेशतीयतयावह्निजन्यतावच्छेदकप्रवेशेगौरवानवकाशात्तत्तोबोद्धतासंबंधेनतज्ज्ञानंप्रति
शरीरस्यहेतुतयानित्यसुखसाक्षात्कारस्यतेनसंबंधेनकुत्राप्यनुत्पत्तेरशरीरस्यापितत्संभवात्तन्नैवमन्यत्रापिशरीरंविनानवह्निज्ञानंस्यादितिवा
च्यंशरीरघटकसामग्र्यासत्तज्ज्ञानयोदितत्वात्तन्नजन्यज्ञानस्यमोक्षनूपत्वतन्नाशेनमोक्षेपिनिवर्त्ततेतिवाच्यंतत्त्वज्ञानव्यक्तिनिवृत्तावपिसुखसा
क्षात्कारधारायाअतिवृत्तेरित्याहुस्तन्नमनोरमंमृतन्मतेपिदुःखात्यंतविमोक्षस्यदुःखसाधनदुरितात्यंतनिवृत्तेर्वामोक्षदशायामावश्यकत्वऽ
नतत्रतत्त्वज्ञानस्यहेतुतायाअपितथात्वेनात्यंतिकदुःखादिनिवृत्तेरवमोक्षनूपतायाउचितत्वात्तन्नित्यसुखतत्साक्षात्कारादिकल्पनायागौ
रवपराहतत्वात्आनंदंब्रह्मणोनूपमित्यत्रचानंदपदंदुःखविरहार्थकमेवमोक्षेप्रतिष्ठितमित्यस्यवासनामिथ्याज्ञाननिवृत्ताउत्तरावधि
रहितंसास्थितमित्यर्थःमुक्तिंप्रत्यात्मतत्त्वज्ञानेहेतुःआत्मावाअरेद्रष्टव्यःश्रोतव्यामंतव्यानिदिध्यासितव्यःरातावदेरवलुअमृतत्वमितिश्रुतेनेता
वद्भ्रवणादिनूपंज्ञानममृतत्वममृतत्वस्यमोक्षस्यहेतुःतत्रकारणंसवासनमिथ्याज्ञानोन्मूलनक्षमःस्मृत्यपादिरूपमाद्यंगकयागविधिनाचिन
निरपवादसेवितनिदिध्यासनजन्ययोगजधर्मप्रयुक्तशरीरादिमित्त्वेनात्मनेःमोक्षात्मानरवशब्दादिज्ञानस्येदृहाभेदवासनानूपदोषविरो
षजन्यायामहंगौरइत्यादिमिथ्याबुधावप्रतिबंधकत्वात्तज्जन्यवासनायाःअनाशकत्वाच्चश्रवणादिर्वृथातद्द्वारामोक्षेपयोगिततरावसंसार

दशायांशाब्दाधीनस्यश्रवणपदवाच्यशाब्दबोधनूपात्मज्ञानस्यमननपदवाच्यायाःशास्त्रादिबाधितवेधर्म्यलिंगकात्मपक्षेदनतरभेदानुमतेःश्र
वणादिमूलकसंस्काराधीनतत्समानविषयकध्यानोपहितेडायानिदध्यासनपदवाच्यायाः सत्वेपिनमोक्षापत्तिःनचश्रवणादिमत्वआत्मतत्वसाऽ
क्षात्कारएवकथमिदानींनोत्पद्यतइतिवाच्यंतस्यचिरकालीनध्यानपरंपरासाध्यत्वात्ततुक्तंआगमेनानुमाननध्यानाभ्यासरसेनचत्रिधाप्रकल्पयन्न्
प्रज्ञांलभतेयोगमुत्तममितिध्यानाभ्यासरसःपानःपुण्यनस्मरणेकानिधाप्रज्ञांश्रवणमननानिदिध्याननूपंत्रिविधज्ञानंप्रकल्पयन्संपादयन्नु
त्तमंयोगमात्मतत्वसाक्षात्कारनूपंलभतइत्यर्थः श्रुतिबाधितेपिशरीरादिभिन्नआत्मनियथाश्रुतश्रुत्यंतरार्थविरोधेनतादृशश्रुतरर्थांतरप
रत्वशंकयातादृशबोधेभ्रमत्वशंकासंभवादश्रध्यानिदिध्यासनंनघटतइतिश्रवणानंतरंमननस्योपयोगंयुक्तिसिधेर्थेप्रमितत्वावधारणन्न
मननमत्यश्रध्यानिश्चेत्तरतरावयुक्तिशास्त्रस्यन्यायवैशेषिकादध्ययनंमोक्षउपयुज्यतेतत्किंचित्तुईश्वरात्मसाक्षात्कारएवमोक्षकारणतस्यादृ
ष्टद्वियत्वेपियोगजधर्मजन्यप्रत्यासत्तत्तत्साक्षात्कारसंभवःनचात्माश्रोतव्यइत्यादावात्मपदस्यजीवात्मपरतासंभवादीश्वरसाक्षात्कारस्यमोक्ष्य
हेतुत्वंनप्रामाणिकमितिवाच्यंवेदाहमेतंपुरुषंमहांतमादित्यवर्णंतमसःपरस्तादित्यनेनेश्वरमुपक्रम्यतमेवविदित्वेत्यननंतहृदनंतस्यैवमोक्षहे
तुत्वबोधनात्॥तदुक्तवाक्यतयात्माश्रोतव्यइत्यादावप्यात्मपदस्येश्वरपरत्वात्॥अतएवन्यायचर्चयमीश्वरस्यमननव्यपदेशमाकूडपासनेवऽ

१ पंचावयवेत्यर्थः१

५अनुयोगितयेत्याद्याचार्यग्रंथाविरोधायपक्षांतरमाहास्तुवेति५

क्रियतेश्रवणानंतरागेतत्याचार्यग्रंथोपिसंगच्छतेनसाक्षात्कारस्यस्वात्मविषयकमिथ्याज्ञाननिवर्त्तकत्वंनविपरीतज्ञानविद्यायापितुस्वात्मत
त्वसाक्षात्कारस्यैवेतिसएवमोक्षहेतुरितिवाच्यंवासनानूपदोषविनाशकतयैवेश्वरसाक्षात्कारस्यमिथ्याज्ञाननिवर्त्तकत्वंदीश्वरसाक्षात्का
रस्यविपरीतज्ञानानात्मकत्वेपिस्वांतर्नाणवमिथ्याधीजन्यवासनानाशकत्वापगमेक्षतिविरहात्संस्कारविपरीतज्ञानयोर्विषयभेदेननाश्य
नाशकभावेभेदादात्मदेहाभेदवासनानाशेदेहभेदावगाहिस्वात्मतत्वसाक्षात्कारकारणतायाऽपिकल्पनीयत्वेनेश्वरसाक्षात्कारस्यन
त्राशकतापक्षेगौरवानवकाशात्अस्तुवावासनानाशार्थमात्मतत्वसाक्षात्कारोपयोगःअनुयोगितयाप्रतियोगितयाचआत्मवतत्वताज्ञा
यइत्याचार्यग्रंथस्याप्यतरावसंगतिर्मोक्षेकारणंतुपरमात्मसाक्षात्कारएवनचयोगजधर्मस्यविश्वभासकतयातज्जन्यपरमात्मसाक्षात्का
रेक्विचेद्भासमानंसभवातेनभवविदित्वेत्यवधारबोध्यायतदितरव्यवछेदस्यईश्वरवेदनेबाधइतिवयंतादृशश्रुतेरीश्वनपरतनिवाच्यं
स्वात्मसाक्षात्कारस्यापिभवदभिमतमोक्षहेतोर्देहादिभेदविषयकतयातत्रापितरविषयकत्वव्यवछेदबाधात्अस्मदभिमतमोक्षहेतुपर
मात्मनिर्विकल्पकस्यैवप्रतिबंधकत्वकल्पनपरतयादितराविषयकत्वोपपत्तेश्चतंविदित्वेवत्येवकारव्यत्ययेनव्याख्ययासमाधानमपि
तुल्यमुभयमतेबस्तुतएवकारव्यत्ययेएवकारस्यैवेत्यर्थेनान्यःपंथाविद्यतेऽयनायइत्येननमुक्तिसामग्रीमात्रेतत्त्वज्ञानघटितान्यत्व

निवारणानततरावमुक्तिपूर्वसमानाधिकरणतत्त्वज्ञानावश्यकत्वयलाभात्अतईश्वरसाक्षात्कारस्यैवकारणत्वमुचितंतथासत्यकारण्यै
वकाराव्यत्यासेपिनिर्वाहसंभवात्अथयतोवाइमानिभूतानिजायंतेतत्त्वमसिश्वेतकेताइतिजीवात्मनःपरमात्माभेदापदेशकश्रुतिस्व
रसादहंब्रह्मास्मीत्येतादृशज्ञानस्यैवभवतामुक्तिहेतुताया३उपगंतव्यतयाअव्यत्यासवकारलभ्यस्यमुक्तिजनकेश्वरज्ञानतदितराविं
षयकत्वस्यबाधइतिभवतापिनव्यत्यासआवश्यकः एतेनावकारेणतद्दर्शनतदन्यविषयकत्वंनव्यवछेद्यतेविंतुमुक्तौनहिषयकत्वावि
शिष्टवेदनप्रयोज्यत्वसान्वयबोधविषयतयातदन्यविषयत्वविशिष्टतद्दर्शनप्रयोज्यत्वमभवतत्रवकारेणव्यवछिद्यतेतथाचतदन्यत्वविष
यकत्वमुक्तिप्रयोजकत्वव्यवछेदःपर्यवसितइतिसामग्रीवशादीश्वरसाक्षात्कारेअनुपयुक्ततरभानस्यावश्यकत्वेपिनक्षतिःजीवात्मत
त्वसाक्षात्कारस्यहेतुतामतेपुनरवकाराव्यत्यासेनान्यरीत्यापिनिर्वाहइतरभेदादिविषयकत्वनिवर्तकत्वसाक्षात्कारस्यमोक्षहेतुतयाइनरवि
षयकत्वंमोक्षप्रयोजकतायाव्यवछेत्तुमशक्यत्वादित्यपिनिरस्तंब्रह्मैवाहंनसंसारीत्यादिभावनाविध्येकवाक्यतयाअहंब्रह्मास्मीतिबोधे
र्न्यायादिमतेब्रह्मैवाभिन्नजीवात्मविषयकतयापिमुक्तिहेतुत्वात्आत्मनानात्वंपश्यंजीवब्रह्मणोरभेदज्ञानंयद्यपिभ्रमस्तथापितादृशस्यै
वतस्यमोक्षहेतुत्वंश्रुतिसिद्धंनविरुध्यतइतिचब्रह्मजीवब्रह्मात्मभेदचिंतनंनृपस्ययोगस्याभ्यासेनमोक्षकारणमीश्वरसाक्षात्कारःसंप

यतइत्यत्रैवतत्त्वमसीतिवाक्यतात्पर्येणयथाश्रुतस्यतमेवविदित्वेत्यस्यसामंजस्यादितिवदंतिदीधितिदूषणतत्त्वमसिवाक्येरपत्यकामाया
पतिःप्रियोभवतीत्यात्मनस्तत्कामायपतिःप्रियोभवतीत्यादिनाआत्मनःस्मरणार्थंतत्संपादकतयापतिपुत्रादेरनुरागविषयत्वनूपंप्रिय
लमित्यत्रतंतत्रात्मपदंस्वात्मपरमेवनत्वीश्वरपरंतस्यस्मरणाभावात्तंतत्रानंदंमत्यमानानामपितदानंदस्यनित्यत्वाभ्युपगमात्तस्यो
द्देश्यत्वासंभवात्सर्वेषामेवभूतानांनृपःस्वात्मैववल्लभइत्यादावपिस्वात्मनरावनिरुपाधिप्रियत्वाभिधानात्तरावंचस्वात्मनरावउपक्रा
तत्वाआत्मावारेश्रोतव्यइत्यादिश्रुत्यास्वात्मस्त्रवणादेरेवमोक्षहेतुनाप्रत्ययातेनतुपरमात्मनः नचमिथ्याज्ञानजन्यत्वात्तनाधर्माधर्मयोर्वि
द्दाराआत्यंतिकदुःखनिदृत्तावुपयोगित्वंस्वात्मतत्त्वज्ञानस्यतादृशश्रुतितात्पर्यविषयोस्तुतावतापिईश्वरस्यसाक्षात्कारस्यतमेवविदित्वे
त्यादिश्रुतिसिद्धमपवर्गहेतुत्वंनिराबाधमेवेतिवाच्यं॥धर्माधर्मोच्छेदनेवात्यंतिकदुःखादिविगमरूपमुक्तिनिर्वाहेतत्र परमात्मसाक्षात्कार
स्यमुक्तिहेतुतायांयुक्तिविरहेतमेवविदित्वेत्यादिश्रुतेर्जीवब्रह्मात्मैक्यचिंतनरूपयोगाभ्यासस्यस्वात्मतत्त्वसाक्षात्कारसंपादनद्वारामुक्त्युपयो
गितामेवयोगाभ्यासविध्येववाक्यतानुरोधेनतात्पर्यकल्पनौचित्यात्तरावंचैवकारव्यत्यासोपिनश्रुतिमाहेतिनान्यःपंथाइत्यादिभागस्या
प्येवकारतात्पर्यप्रकाशकत्वेनसार्थक्यसंभवात्महेश्वरस्त्वंबहरावनापरइत्यादिभागस्येवत्याहुःतन्मतेयोगिनस्तंप्रपश्यंतिभगवंतमउ

धोऽस्त्वजमित्यादिनायोगाभ्यासस्यपरब्रह्मसाक्षात्कारफलकत्वनूपपत्तेश्रुतार्थविरोधेदृष्टेरिहारः अथकाश्यादिमरणपुरुषोत्तमसुखदर्शनादिनूपकर्म
णामपिबहुशोमोक्षोपायतास्मृतेः कथंनान्यः पंथाविद्यतइत्यादेःसामंजस्यंकथंवाननुगतानांज्ञानकर्मविशेषाणामनुगतंमोक्षंप्रतिहेतुतानिर्वा
हःतृणारणिमणीनांवन्हिहेतुताचकार्यवैजात्येनव्यभिचारविरहात्मोक्षेचाभावनूपपत्तेर्जातिविशेषकल्पनासंभवः नचप्रतियोगिनिदुःखेदृष्टि
तेवाजातिविशेषान्कल्पयित्वातदवच्छिन्नप्रतियोगिनांस्वाश्रयप्रतियोगिकत्वसंबंधेनतेषामेववाजन्यतावच्छेदकत्वमुपगम्यव्यभिचारःशक्य
तेवारयितुंगोवधादिजन्यतावच्छेदकजातिभिःसंकरप्रसंगेनजातिविशेषकल्पनानवकाशात्तन्यगोवधादिजन्यतावच्छेदकजातीनांनाना
त्वोपगमान्नसंकरप्रसंगइतिवाच्यंतासांनानात्वेनतत्वज्ञाननाश्यतावच्छेदकजातीनांवानानात्वमित्यत्रविनिगमकस्यदुर्लभत्वात्तरावंवेदबोधि
तवैकल्पिकहेतुतास्थलेसमुच्चितेभ्योनफलसिद्धिःसमुच्चितव्रीहियवाभ्यामेकयागाननुष्ठानादितितृणारणिमणिवज्ञानकर्मणांहेतुत्वेनतत्सेवल
नेमोक्षाभावप्रसंगात्तत्रापिज्ञानकर्मणांसमुच्चितानांमोक्षेहेतुतास्वीकारात्सामंजस्यंतत्वज्ञानोपायेयोगाभ्यासेसाधुताबुधोमोक्षहेतुतत्तत्क
र्मसुप्रवृत्त्यनुपपत्तेःमथराकाशीमरणादीनांसंचलनासंभवाच्चसाहित्यविनिगमेकिणश्रुत्योनेकधांकारणतायत्रप्रत्यायितेतत्रविकल्पएवव्रीहि
यववदित्यपायकारोक्तसिद्धांतभंगश्चैवमापद्यततदनादरोव्रीहियवस्थलेपिसमुच्चयप्रसंगात्।वाजपेयाग्निष्टोमादिनामपिमिथःसहका

रितापसंगाच्चैवंसर्वत्रात्मतत्वज्ञानमेवसाक्षान्मोक्षहेतुःकाशीमरणादश्यतत्वज्ञानद्वारैवमोक्षोपायताकाशीमरणादीनांमोक्षोपायताबोधक
श्रुतीनांसत्कारजनकत्वंनार्थः अपितुप्रयोजकत्वमेवअतएवज्ञानेनसहकाशीमरणादेर्द्वारद्वारिभावेनसमुच्चयेपिसाहित्यंविनावेदबोधितानेककारण
तास्थलेनसमुच्चयइतिसिद्धांतस्यापिविरोधः तत्वज्ञानेमानमात्मवेदकाशीमरणादिजन्यतावच्छेदकतयाजातिविशेषाणांमानसत्वव्याप्यानांकल्प
यितुंशक्यतयामिथोव्यभिचारानवकाशात्मृतशरीरावच्छेदनज्ञानोत्पत्तिसंभवेनकाशीमरणादुत्तनशरीरांतनपरिग्रहेपिकल्पनेऽन्यगति न
कत्वात्भगवतोमहारुद्रस्यतारकोपदेशस्तुमुमूर्षुतादशायामवश्यंमृतस्यापदेश्यत्वासंभवात्तदुपदेशस्याप्यदृष्टद्वाराशरीरांतरपरिग्रहाधीना
त्मतत्वसाक्षात्कारजनकत्वंनचमुमूर्षुतादशायांतारकोपदेशतत्तच्छरीरावच्छेदेनात्मतत्वसाक्षात्कारसंभवात्किमर्थंशरीरांतरस्वीकारइ
तिवाच्यंतच्छरीरावच्छेदनतारकब्रह्मोपदेशादात्मतत्वज्ञानस्वीकारेकाशीमरणतद्धेतुत्वानुपपत्तेः यदिचकाशीमरणकारणताबोधकवा
क्यानांतदानीमवश्यकतारकोपदेशस्येहतुतायामवतात्पर्यमन्यथैदृनापरस्यान्यथासिद्धेर्ब्रीहित्वादित्युच्यतेतदातच्छरीरावच्छेदेनापि
तत्वज्ञानसंभवोवाच्यः काशीमरणात्मतत्वज्ञानतारकोपदेशसंपादनेनैवापेक्षितंकाशीमरणोत्तरमवभगवान्तारकमुच्चरितंतच्चोच्चा
रणंतच्छरीरावच्छेदनज्ञानमनुत्पाद्यापदृष्टद्वारातदुत्तनगृहीतशरीरावच्छेदेनात्मतत्वज्ञानमुत्पादयतिइत्यपिक्वचित्काशीगंगामथरा

३ काशीमरणोपदेशयोरुभयोस्तत्वज्ञानहेतुत्वे ३

मरणादीनामदृष्टद्वारासंवलनसंभवेपिउक्तयुक्तेर्वैकल्पिकीकारणेतवतत्रतानेतृणादिनांवन्ह्याविवनत्वेवव्रीहियवयोरिवकाशीगंगामरणयोः फलो
त्पादकत्वप्रसंगइतिवाच्यंवैषम्यात्तथाहिसमव्रीहियवयोरेकप्रकरणेऽक्रमेणयागसाधनतायाविधानाद्व्रीहेः साधनत्वेप्रथमतोलब्धेसाधनांतरका
ङ्क्षानुदयात्तद्व्रीह्यवरणवत्कः फलसाधनमितिविकल्पमुख्याकांक्षयैवयवविध्युथानमितिवाच्यंतादृश्याश्चात्माकांक्षायाव्रीहिवरणत्वाभावविशिष्ट
विशेषरूपावढिंत्रेयागेफलसाधनताबोधविषयत्वाद्दाकाराध्याहरणयैवयंजतेत्यादिवाक्यात्तद्व्रीहिवरणत्वात्मावयवकरणत्वोभयविशेषणवि
शिष्टयागविषयकरावफलसाधनताबोधः स्वीकरणीयः विशिष्टचयस्यकार्यस्यासाधनतायाअन्वयाविशेषणस्यतत्कार्यप्रयोजकत्वेवदस्यता
त्पर्यमौत्सर्गिकमितिव्रीहिभिर्यजेतेत्यतोव्रीहिवरणत्वस्यैववयवैरित्यतश्चयवकरणत्वस्यैवतेतोव्रीह्यवरणत्वरूपविशेषणस्यापिफलोपऽ
योगित्वंप्रतीयतेअतउभयोरशास्त्रार्थतापरकृतेत्वप्रकरणभेदात्तद्विधिप्रवृत्तेः पौर्वापर्यानियमनमोक्षस्यैविकारणमित्यतावन्मात्राकांक्षयैवसाध
नत्वेनगंगामरणकाशीमरणादीनांविधानादितरासाहित्यविशिष्टानामेवतेषांमोक्षसाधनताप्रतीयतेअतःकाशीमरणंगंगामरणंभगवन्ना
मस्मरणपूर्वकमरणंरूपसाधनसंवलनेपिफलसिद्धिर्निश्चित्यूहैवतिनपरस्परभावसापेक्षतायथाव्रीहियवयोर्विरुद्धकल्पनातथानप्रकृ
तेऽपितुवाजपेयाश्वमेधादिवत्पृथक्कल्पैतेवविकल्पाद्भयोरशास्त्रार्थतापरवादश्चविरुद्धकल्पनारूपकल्पपरःनतुपृथक्कल्पनारूपविकल्पपरः

अथपरस्परभावसापेक्षतावीहियवस्थलेऽथप्राणिकीप्रथमप्रवृत्तव्रीहिविधितोयवकर्तृकत्वाभावविशिष्टस्यैवव्रीहिकर्तृकदर्शागस्यफलसा
धनताप्रत्यायनादितिचेन्नतृणानिरपेक्षान्मणिन्यूपद्रव्याहन्यसत्तावपितृणाहन्हिर्जायेतद्रव्याहत्यप्रयोगात्तत्तरवाक्यस्थेनापूर्वकल्पव्यवच्छेद
साहित्यस्यापिपूर्वकल्पबोधइतिव्युत्पत्तेःव्रीहिभिर्यजेतयवैर्वाइत्यादावपिव्रीह्यादीयवाभावसाहित्यबोधस्यव्युत्पत्तिसिद्धत्वादित्यन्यत्रविस्त
रः॥ ॥इतिश्रीमन्महामहोपाध्यायगदाधरभट्टाचार्यचक्रवर्त्तिविरचितंमुक्तिवादरहस्यंसमाप्तम्॥ ॥श्रीरामचंद्रायनमः॥श्रीरामा॥